सङ्गवः, पुं, (सङ्गता: गावो दोहनार्थं यत्र । निपातनात् साधुः ।) प्रातःकालात् परं मुहूर्त्त-त्रयम् । यथा,—

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम् ।
सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ॥"

इति तिथ्यादितत्त्वम् ॥

(यथा, ऋग्वेदे । ६ । ७६ । ३ ।

"उतायातं सङ्गवे प्रातरह्नो
मध्यन्दिन उदिता सूर्य्यस्य ॥"

"अह्नो द्वेधा त्रेधा पञ्चदशधेति समाना विभागाः सन्ति इह पञ्चधा विभाग आस्तः उतापिचायातं आगच्छतं कदा सङ्गवे सङ्गवकाले । सङ्गच्छन्ते गावो दोहनभूमिं यस्मिन् काले स सङ्गवः । रात्रपरकाले हि गावो वने हिमदृणानि भक्षयित्वा पुनर्दोहाय सङ्गवे प्रतिनिवर्त्तन्ते ॥" इति तद्भाष्ये सायणः ॥)

सङ्गी, [न्] त्रि, (सङ्गोऽस्यास्तीति । इनिः ।) सङ्गविशिष्टः । यथा,—

"आम्नलुतो नैव मनोरथाना-
मन्तोऽस्ति विज्ञातमिदं मयाद्य ।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमार्थसङ्गि ॥"

इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

सङ्गीतं, क्ली, (सं + गै + क्तः ।) प्रेक्षणार्थनृत्य-गीतवाद्यम् । यथा, हेमचन्द्रः ।

"गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्च तत् ।
सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्य-
धर्म्मिका ॥"

नृत्यगीतवाद्यस्य शास्त्रम् । तत्तु सोमेश्वरभरत-हनूमत्कल्लिनाथमतभेदात् चतुर्व्विधम् । अधुना हनूमन्मतं प्रचलितम् । तस्य अध्यायाः सप्त स्वराध्यायः १ रागाध्यायः २ तालाध्यायः ३ नृत्याध्यायः ४ भावाध्यायः ५ कोकाध्यायः ६ हस्ताध्यायश्च ७ । इति सङ्गीतशास्त्रम् ॥ * ॥

सङ्गीतावसाने ताम्बूलदानप्रमाणं यथा,—

"ता वासुदेवोऽप्यनुरक्तचित्ताः
संनृत्य गीताभिनयैरुदारैः ।
नरेन्द्रसूनो परितोषितेन
ताम्बूलयोगेन वराप्सरोभिः ॥
तदागताभिर्नृवराद्धृतास्तु
कृष्णः सया मानमयास्तथैव ।
फलानि गन्धोत्तमवन्ति वीरा-
ञ्छालिक्वगान्धर्व्वमथाहृतञ्च ॥
कृष्णच्छया च त्रिदिवाद्वदेव
अनुग्रहार्थं भुवि मानुषाणाम् ।
स्थितञ्च रम्यं हरितं जमेव
प्रयोजयामास स रौक्मिणेयः ।
कान्तिकगान्धर्व्वमुदारबुद्धि-
स्तमेव ताम्बूलमथ प्रयुक्तम् ॥"

इति हरिवंशे भानुमतीहरणे जलक्रीडायाम् १४८ अध्यायः ॥

सङ्गीतिः, स्त्री, (सं + गै + "स्थागापापचो भावे" ३ । ३ । ९५ । इति क्तिन् ।) आलापः । इति हलायुधः ॥ सङ्गीतञ्च ॥

सङ्गीर्णं, त्रि, (सं + गॄ + क्तः ।) अङ्गीकृतम् । इत्यमरः ॥

सङ्गुप्तः, पुं, (सं + गुप् + क्तः ।) बुद्धभेदः । इति हेमचन्द्रः ॥ सङ्गोपनाश्रये, त्रि ॥

सङ्गूढः, त्रि, (सं + गुह + क्तः ।) लेखादिना संहतः । इति भरतः ॥ रेखादिना पुञ्जीकृत-धान्यादिः । इति नीलकण्ठः ॥ तत्पर्य्यायः । सङ्कलितः २ इत्यमरः ॥

सङ्गोपनं, क्ली, (सं + गुप + ल्युट् ।) सम्यक्प्रकारेण गोपनम् । संपूर्व्वगुपधातोरनट्प्रत्ययेन निष्पन्नम् ॥

सङ्ग्रहः, पुं, (सं + ग्रह + अप् ।) समाहृतिः । इत्यमरः ॥ (यथा, रघुः । १७ । ६० ।

"कोशेनाश्रयणीयत्वमिति तस्यार्थसंग्रहः ।
अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते ॥")

"संक्षेपेण गृह्यन्ते नानास्थाने विप्रकीर्णा अर्था बुध्यन्तेऽनेन संग्रहः । संपूर्व्वात् ग्रह आदाने-ऽल् ।

'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः ॥'

इति ॥

इतस्ततः आकृष्य एकत्र निबन्धनं संग्रहः । इति कल्पतरुप्रभृतयः ।" इत्यमरटीकायां भरतः ॥ नानाग्रन्थस्था अर्थाः संगृह्यन्ते एकस्थानस्थाः क्रियन्ते इति संग्रहो ग्रन्थविशेषः । इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः ॥ * ॥ (यथा, हरिवंशे । ८९ । ७ ।

"चतुष्पादं धनुर्व्वेदं शास्त्रग्रामं ससङ्ग्रहम् ।
अचिरेणैव कालेन गुरुस्तावभ्यशिक्षयत् ॥")

बृहत् । उत्तुङ्गः । ग्रहणम् । (यथा, रघुः । १ । ६६ ।

"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥")

संक्षेपः । इति मेदिनी ॥ मुष्टिः । इति विश्वः ॥ स्वीकारः । महोद्योगः । इति नानार्थरत्न-माला ॥

सङ्ग्रहणी, स्त्री, (सञ्चिता ग्रहणी ।) ग्रहणी-रोगः । तस्य निदानादि ग्रहणीशब्दे द्रष्टव्यम् । अथ सामान्यग्रहणीरोगस्य चिकित्सामाह ।

"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः ॥
दोषं साम निरामञ्च विद्यादत्रातिसारवत् ।
अतिसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ॥
कपित्थबिल्वचाङ्गेरीतक्रदाड़िमसाधिता ।
यवागूः पाचयत्यामं सकृत् संवर्त्तयत्यपि ॥"

संवर्त्तयति घनीकरोति ॥ * ॥ औषधान्याह ।

"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविड़ङ्गमरिचैः समभागैर्विचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गाञ्च तावतीम् ।
सर्व्वचूर्णसमानाश्च प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः ।
नाशयेद्ग्रहणीं कासं चयं श्वासमरोचकम् ॥"

इति जातीफलादिचूर्णम् ॥ * ॥

"चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
व्योषं हिङ्ग्वजमोदाञ्च चव्यं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाड़िमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥"

क्षारौ स्वर्जिकायवक्षारौ । लवणपञ्चकमिति । सैन्धवं रुचकञ्चैव विड़ं सामुद्रिकं गड़मिति । व्योषं शुण्ठीपिप्पलीमरिचानि । अजमोदाव यवानिका । मातुलुङ्गं बीजपूरकम् । चित्र-कादिवटिका ॥ * ॥

"श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः सगुड़ः ।
ग्रहणीमदमत्युग्रं तक्रभुजा शीलितो जयति ॥"

श्रीफलशलाटुः बिल्वस्यामं फलम् । गुड़स्यात्र भागद्वयम् । बिल्वकल्कः ॥ * ॥

"चतुष्पलं सुधाकाण्डं त्रिफलं लवणत्रयम् ।
वार्त्ताकोः कुड़वञ्चार्कमूलाद्द्विपलं तथानलात् ॥
दग्धद्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ताभुक्तं पचत्याशु नाशयेद्ग्रहणीगदम् ।
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥"

इति वार्त्ताकुगुटिका ॥ * ॥

"मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम् ।
मधुना च समालीढ़ं ग्रहणीं सर्व्वजान्यजीत् ॥"

कौटजं इन्द्रयवः । मुस्तादिचूर्णम् ॥ * ॥

"श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः ।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥"

सर्ज्जः राल इति लोके । सर्ज्जरसचूर्णम् ॥ * ॥

"बिल्वाब्दशक्रयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजं ग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥"

मोचो मोचरसः । क्षिणोति हन्ति ।

"प्रस्थत्रये त्वामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्ग्रन्थितजीरचव्य-
व्योषेभकृष्णाहवुषाजमोदैः ॥
विड़ङ्गसिन्धुत्रिफलायवानी
पाठाग्निधान्यैश्च पलप्रमाणैः
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वा ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तराग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।